पार्थिव गणपतिपूजाविधानम्

सर्व प्रथम आचमन, प्राणायाम के अनन्तर देशकाल उच्चारणपूर्वक संकल्प करे-

मम इह जन्मनि पुत्र-पौत्रधनविद्या - जययश - स्त्रीकामायुष्याभिवृध्द्यर्थे पार्थिवगणपतिप्रीत्यर्थं

आदि शंकर वैदिक विद्या संस्थान
दूरभाष: 9044016661

यथामीलितोपचारैः पूजनमहं करिष्ये ।

सर्वप्रथम निर्विघ्नतासिद्ध्यर्थ महागणपतिस्मरण के अनंतर कलश, शंख, घण्टापूजन पूजन कर घंटानाद करें।

पुनः निम्न मन्त्र से समस्त पूजन सामग्री प्रोक्षित कर पार्थिव गणपति की प्रतिष्ठा करें-

“ॐ अपवित्र: पवित्रो वा सर्वावस्थां गतोपि वा।

य: स्मरेत् पुण्डरीकाक्षं स: बाह्याभंतर:शुचि:।।”

पार्थिवगणपतिध्यान -

पाशांकुशधरं देवं ध्यायेत्सिद्धिविनायकम् ॥

ध्यायेद्देवं देवं ध्झायेत्सिद्धिविनायकम् ॥

ध्यायेद्देवं महा-काय तप्तकांचनसन्निभम् ॥१॥

आवाहन-

आवाहयामि विघ्नेश सुरराजार्चितेश्वर ॥

अनाथ-नाथ सर्वज्ञ पूजार्थं गणनायक ॥२॥

आसन-

विचित्ररत्नरचितदिव्यास्तरणसंयुतम् ॥

स्वर्ण-सिंहासनं चारु गृहान सुरपूजित ॥३॥

पाद्य-

सर्वतीर्षसमुद् भूतं पाद्यं गंधादिसंयुतम् ॥

विघ्न-राज गृहाणेदं भगवन् भक्तवत्सल ॥४॥

अर्घ्य-

अर्घ्यं च फलसंयुक्तं गंधपुष्पाक्षतैर्युतम् ॥

गणा-ध्यक्ष नमस्तेऽस्तु गृहाण करुणानिघे ॥५॥

मधुपर्क -

दध्याज्यमधुसंयुक्त : मधुपर्को मयाहृत: ॥

गृहाण सर्वलोकेश गणनाथ नमोऽस्तु ते ॥६॥

आचमन -

विनायक नमस्तुभ्यं त्रिदशैरभिवं-दितम् ॥
गंगोदकेन तोयेन शीघ्रमाचमनं कुरु ॥७॥

पयस्नान -

पयो दधि घृतं चैव शर्करामधुसंयुतम् ॥
पंचामृतेन स्नानेन प्रीयतां गणनायक ॥८॥

दधिस्नान-

चन्द्रमण्डलसंकाशं सर्वदेवप्रियं दधि ॥
दध्ना ददामि देवेश प्रीयतां परमेश्वर ॥९॥

घृतस्नान -

आज्यं सुराणामाहार: आज्यं यज्ञे प्रतिष्ठितम् ॥
आज्यं पवित्रं परमं स्नानार्थं प्रतिगृह्यताम् ॥१०॥

मधुस्नान -

सर्वौषधिसमुत्पन्नं पीयूषसदृशं मधु ॥

ददामि मधु देवेश प्रीयतां परमेश्वर ॥११॥

शर्करास्नान -

इक्षुदण्डसमुद् भूता शर्करा मधुरा विभो ॥

स्नानार्थं ते मयानीता गृहाण परमेश्वर ॥१२॥

स्नान -

गंगा च यमुना चैव गोदावरी सरस्वती ॥

गंधतोयमुमापुत्र गृह्लीष्वाभीष्टदायक ॥१३॥

पुन: गंधादि से पूजन कर निर्माल्य हो हटा कर गणपति अथर्ववेदशीर्ष अथवा पुरुषसूक्त से अभिषेक करे।

वस्त्र -

रक्तवस्त्रद्वयं देव दिव्यकांचनसंभवम् ॥

सर्वप्रद्म गृहाणेदं लंबोदर हरात्मज ॥१४॥

यज्ञोपवीत -

राजतं ब्रह्मसूत्रं च कांचनं त्वोत्त-रीयकम् ॥

गृहाण चारु सर्वज्ञ भक्तानां वरदो भव ॥१५॥

सिंदूर

उद्यद् भास्करसंकाशं संध्यावदरुणं प्रभो ॥

वीरालंकरणं दिव्यं सिंदूआं प्रतिगृह्यताम् ॥१६॥

आभरण-

नानाविधानि रत्नानि नानारत्नोज्वलनि च ॥

भूषणानि गृहाणेश पार्वतीप्रियनंदन ॥१७॥

गंध -

कस्तूरी - चंदनं चैव केशरेण समन्वितम् ॥

विलेपनं सुरश्रेष्ठ चंदनं प्रतिगृह्यताम् ॥१८॥

अक्षत -

रक्ताक्षताश्च देवेश गृहाण द्विरदानन ॥

ललाट-पटले चन्द्रे तस्योपरि निधीयताम् ॥१९॥

अंगपूजा -

गणेश्वराय नमः पादौ पूजयामि ।

विघ्नराजाय नमः जानुनी पूजयामि ।

आखुवाहनाय नमः ऊरुं पूजयामि ।

हेरंबाय नमः कटिं पूजयामि ।

कामारिसूनवे नमः नाभिं पूजयामि ।

लंबोदराय नमः उदरं पूजयामि ।

गौरिसुताय नमः स्तनौ पूजयामि ।

गणनायकाय नमः ह्लदयं पूजयामि ।

स्थूलकर्णाय नमः कण्ठं पूजयामि ।

स्कंदाग्रजाय नमः स्कंधं पूजयामि ।

पाशहस्ताय नमः हस्तौ पूजयामि ।

गजवक्त्राय नमः वक्त्रं पूजयामि ।

विघ्नहर्त्रे नमः ललाटं पूजयामि ।

सर्वेश्वराय नमः शिरः पूजयामि ।

श्रीगणाधिपाय नमः सर्वाङ्गं पूजयामि ।

पत्रपूजन -

सुमुखाय नमः मालतीपत्रम् ।

(प्रत्येक बार समर्पयामि का नियोजन करे)

गणाधिपाय नमः भृंगराजं ।

उमापुत्राय नमः बिल्वपत्रं ।

गजाननाय नमः श्वेतदूर्वां ।

लंबोदराय नमः बदरीपत्रं ।

हरसूनवे नमः धत्तुरपत्रं ।

गजकर्णाय नमः तुलसीपत्रं ।

वक्रतुण्डाय नमः शमीपत्रं ।

विघ्नराजाय-विष्णुक्रान्ताय-गुहाग्रजाय-नमः

अपामार्गं

एकदंताय विकटाय कपिलाय नमः अर्कपत्रं ।

बटवे नमः दाडिमपत्रं ।

सुराग्रजाय नमः देवदारु- पत्रं ।

भालचन्द्राय नमः भरूपत्रं ।

हेरंबाय नमः अश्वत्थपत्रं ।

चतुर्भुजाय नमः जातिपत्रं ।

विना-यकाय नमः केतकीपत्रं ।

सर्वेश्वराय नमः अगस्ति-पत्रं (समर्पयामि) ।

धूपं -

दशांगगुग्गुलं धूपं सुगंधं च मनोहरम् ॥

गृहाण सर्वदेवेश उमापुत्र नमोऽस्तु ते ॥२०॥

दीप (नीरांजन) -

सर्वज्ञ सर्व- लोकेश त्रैलोक्यतिमिरापह ॥

गृहाण मंगल्म दीपं रुद्रप्रिय नमोऽस्तु ते॥२१॥

नैवेद्य -

नानाबखाद्यमयं दिव्यं तुष्टयर्थं ते निवेदितम् ॥

मया भक्त्या शिवापुत्र गृहाण गणनायक ॥२२॥

नैवेद्यसमर्पणानंतर -उत्तरापोशनार्थे जलं दद्यात्॥

फल -

बीजपूराभ्रपनसं खर्जुरीकदलीफलम् ॥

नारिकेलफलं दिव्यं गृहाण गणनायक ॥२३॥

तांबूल -

नागवल्लीदलैर्युक्तमेकविंशति-संख्या ॥

क्रमुकं चूर्णसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥२४॥

तदनंतर दक्षिणा देकर आभूषण प्रदान करे।

भूषण-

घज्रमाणिक्यवैडूर्यमुक्ताविद्रुम -मण्डितम्॥

पुष्परागसमायुक्तं भूषणं प्रतिगृह्यताम् ॥२५॥

दूर्वा -

एकदंताय नमः,

उमापुत्राय नमः,

अघनाशनाय नमः,

इभवक्त्राय नमः,

मूषकवाहनाय नमः,

विनायकाय नमः,

ईशपुत्राय नमः,

सर्वसिद्धिप्रदाय नमः,

कुमार-गुरवे नमः

दूर्वाङ्कुरान् समर्पयामि ।

नमस्कार-

गणाधिप नमस्तेऽस्तु उमापुत्राघनाशन ॥

एकदंतेभवक्त्रेति तथा मूषकवाहन ॥२६॥

विनायकेशपुत्रेति सर्वसिद्धिप्रदायक ॥

कुमारगुरवे तुभ्यं प्रणमामि पुनः पुनः ॥२७॥

कपूर -

चंद्रादित्यौ च धरणी विद्युदग्निस्तथैव च ॥

त्वमेव सर्वतेजांसि आर्तिक्यं प्रतिगृह्यताम् ॥२८॥

प्रदक्षिणा -

विघ्नेश्वर विशालाक्ष सर्वाभीष्टफलप्रद ॥
प्रदक्षिणां करोमि त्वां सर्वान्कामान्प्रयच्छ मे ॥२९॥

पुनश्च नमस्कार -

नमस्ते विघ्नसंहर्त्रे नमस्ते ईप्सितप्रद ॥
नमस्ते देवदेवेश नमस्ते गणनायक ॥३०॥

मंत्रपुष्प -

विनायकेशपुत्रेति गणराज सुरोत्तम ॥
देहिमे सकलान्कामान् वन्दे सिद्धिविनायक॥३१॥

प्रार्थना -

नमस्तस्मै गणेशाय ज्ञानविज्ञानपदायक ॥
यस्य बलायते नाम विघ्नारण्यविदारणे ॥३२॥

विशेषार्घ्य

नमस्तस्मै गणेशाय नमस्तस्मै हरात्मज ॥
विशेषार्घ्यं प्रदास्यामि गृहाण करुणानिघे ॥३३॥

“सिद्धिबुद्धिबुद्धिसहिताय पार्थिवगणपतये विशेषार्घ्यं समर्पयामि ।

समर्पण -

अनेन यथामीलितोपचारद्रव्यैः षोडशोपचारपूजनेन सिद्धिबुद्धिसहितः पार्थिव-गणपतिः प्रीयताम् ॥

इति पार्थिव गणपतिपूजा ॥